International Journal of Sanskrit Research 2018; 4(6): 71-72

International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2018; 4(6): 71-72
© 2018 IJSR
www.anantaajournal.com
Received: 14-09-2018
Accepted: 15-10-2018

प्रवीण कुमार
शोधच्छात्र, राष्ट्रिय संस्कृत संस्थान, नई दिल्ली, भारत

Correspondence
प्रवीण कुमार
शोधच्छात्र, राष्ट्रिय संस्कृत संस्थान, नई दिल्ली, भारत

# कथाञ्जलिः'' इति लघुकथाग्रन्थे वर्णिताः वर्त्तमानकालस्य समस्याः

प्रवीण कुमार

## प्रस्तावना

आधुनिकसंस्कृतगद्यसाहित्ये वर्तमानसमये लघुकथासाहित्यस्य स्वकीयमग्रण्यः स्थानं भजते। यतोहि लघुकथां मानवजीवनस्य अभिन्नोङ्गं विद्वद्भि मन्यन्ते। लघुकथासु मानवजीवनस्य यथार्थचित्रणं भवति। कथाञ्जलिरियम् डॉ..... योगेन्द्रनाथशुक्ल–महाभागानां हिन्दीलघुकथानामनुवादः कश्चन प्रकल्पः। डॉ. योगेन्द्रनाथशुक्लमहाभागाः हिन्दीभाषायाः सुपरिचिता लेखकाः सन्ति। लघुकथाव्यंग्यगजलगीतिप्रभृतिनैका विधासु साधिकारं लेखनं कृतमस्ति श्रीशुक्लमहाभागैः। लघुकथासंग्रहोऽयं लघुकथाशिखरसम्मानेन सम्मानितोऽस्ति। एतदतिरिक्तं विविधैः पुरस्कारैः सम्मानैश्च सभाजिताः सन्ति शुक्लवर्याः। तेषां लघुकथानां विविधासु भाषासु भारतीय–भाषासु अनुवादो सञ्जातः। श्रीशुक्लविरचितासु कथासु पञ्चपञ्चाशत् कथाः अनुवादार्थमात्र डॉ. अर्चनाजोशीमहोदया संकलिताः। डॉ. अर्चनायाः अनूदिता रचनामन्यते। ''कथाञ्जलिः'' विषये डॉ. अर्चनाजोशी कथयति– अनूदिताः याः कथाः सन्ति तासां हिन्दीमूलकथाः कतिपयास्तु ''लघुकथाओंका पिटारा'' इति संग्रहात् गृहीताः कतिपयाः कथाः ''गद्यसप्तक–2'' इति संग्रहात् गृहीताः। कतिपयाश्च विविधासु पत्रिकासु, दिनपत्रेषु, च प्रकाशिताः आसन् तासु यथारुचि मया चिता अनुवादकार्यार्थम्। अत्र लघुकथाग्रन्थे वर्तमानसमये देशस्य प्रमुखानां समस्यानां प्रकाशनं लेखकस्य लघुकथानामुद्देश्यं दृश्यते। प्रत्येके लघुकथायामेका ज्वलन्तं समस्यायाः चित्रणं वर्तते। लघुकथानामाधारे समस्याः प्रति जनानां जागरणमेव लधुकथानामुद्देश्यं वर्तते। अत्र लघुकथाग्रन्थे मुख्यरुपेण कृषकानां समस्याः, जनानां स्वार्थभावनाः आतंकवाऽस्य समस्याः, भ्रष्टाचारस्य समस्याः, नारीजीवनस्य समस्याः, अस्पृश्यता, राष्ट्रप्रेमस्याभावः, स्वार्थयुत्ताः दोषयुक्ताः भ्रष्टाराजनीतिः आदयः प्रमुखानां समस्यानां चित्रणं वर्तते। अत्र शोधपत्रे समस्यानां संक्षिप्तो परिचयो मयात्र प्रस्तूयते।

**1. कृषकानां समस्याः** ''कथाञ्जलिः'' इति लघुकथाग्रन्थे उद्धृताः 'उपद्रवः'' इति लघुकथायां कृषाकानां समस्यानां मार्मिको चित्रणमुपलभ्यते। अत्र कथायां ग्रामीणकृषकानां अनावृष्टिः मूल्यवृद्धिः, दुर्भिक्षं, संसाधनामाभावः, रोजगारस्याभावः इत्यादयः समस्यानां चित्रणं सञ्जीवो दृश्यते यथा– 'अनावृष्टिं मूल्यवृद्धिं दुर्भिक्षं च विषयीकृत्य विधानसभायां भृशमुपद्रवः कोलाहलश्चं जातः, किन्तु उपद्रवः कोलाहलश्चायं तदपेक्षया तु न्यून एव आसीत्। यः रात्रौ तस्यां भगतधरलौहकारस्य कुटीरे प्रवर्तितोऽभवत्। [1]

**2. नारीजीवनस्य समस्याः** लघुकथाग्रन्थे वर्णिताः ''द्वन्द्वः'' इति लघुकथा नारीजीवनस्य समस्यानां मर्मस्पर्शी चित्रणं प्रस्तुतं करोति। कथायां वर्णिताः यद् नारीजीवनं सर्वदा द्वन्द्वपूर्णो दृश्यते एकतः परिवारस्य दैनिककार्याणि अपरतः वित्तीयव्यवस्था। वर्तमानसमये यस्मिन् गृहे गृहस्वामी यदि कोऽपि आजीविकायाः कार्यं नैव करोति, तस्मिन् परिवारे आर्थिकसमस्या भवति तथा नारीजीवनं द्वन्द्वपूर्णं जायते–यथा अद्य प्रातः कालादेव तस्याः मनसि पुनरपि तस्य द्वन्द्वस्यारम्भोऽभवत्।... एकतः तस्याः अपत्यद्वयं, अलब्धवृत्तिपतिः, प्रत्यहं सततं वर्धमानो धनव्ययः अपरश्च बाल्यावस्थायां शिक्षितानां सस्काराणां ह्रासभयम्। एकतः दायित्वानां राशिः अपरतः अधिकारिणः लिप्सा। [2]

**3. साम्प्रदायिकतावादः आतंकवादश्च समस्याः** अत्र लघुकथाग्रन्थे वर्णिताः ''पुस्तकम्'' इति लघुकथायां साम्प्रादायिकतावादस्य, आतंकवादस्य च समस्यायाः सञ्जीवो चित्रणमुपलभ्यते। वर्तमानसमयेऽस्माकं राष्ट्रे आतंकवादस्य, साम्प्रदायिककलहो मन्दिरमस्जिदमधिकृत्य हिन्दू–मुस्लिमसमुदाये परस्परं कलहो भवति। येन महती धनजनयोः हानिर्भवति। आतंकवादसाम्प्रदायिकतावादश्च राष्ट्रस्य कृते सर्वाधिकं हानिकारकं तत्वं मन्यते। यथा– मुख्यमार्गेषु ''एम्बुलेन्स'' वाहनानामग्निशामकवाहानानां च 'सायरन' ध्वनिः वीथिषु च 'हर–हर महादेव'! ''अल्लाह–हो–अकबर'' इति ध्वनिः पौन–पुन्यते श्रवणंगौचरो भवति स्म, येन हि वातावरणं नितरां भयावहं भवति स्म्। [3]

**4. अस्पृश्यतायाः समस्याः** ''अस्पृश्यता'' इत्येका सामाजिकी समस्याः वर्तते। यथा माध्यमेन समाजस्य, राष्ट्रस्य वा विनाशो भवति। विकासो चोऽवरुद्धो जायते। यद्यपि अस्माकं देशे सर्वत्र समानतायाः वार्ताः भवति परन्तु अद्यापि ग्रामीणपरिवेशे अस्पृश्यतायुक्तो व्यवहारो कुत्रचित् दृश्यते यथा– भवान् कदा पर्यन्तं मे पक्षधराः भविष्यति। शिक्षकोडस्म्यहम्, किन्तु कूपात् मह्यम् इरतः एव जलं प्रदीयते। भवान् एव कथयतु न मया भवत्सदृशे उच्चकुले जनिर्लब्धा, तर्हि कोऽत्र मेऽपराधः...? वाष्पेन तस्य कण्ठोऽवरुद्धौ जातः। [4]

**5. वर्तमानकालस्य स्वार्थयुक्तं भ्रष्टराजनीतेः समस्या**

''कथाञ्जलिः'' इति लघुकथाग्रन्थे ''ईर्ष्या'' रावणः कथायोः वर्त्तमानकालस्य स्वार्थयुक्तं भ्रष्टाराजनीतेः समस्यायाः चित्रणं प्रस्तुतम्। यतोहि अधुना मतदानावसरे नेतारः जनान् समक्षे नानाविधाः घोषणाः कुर्वन्ति यदा मतदानः समाप्तो जायते तदा ते सर्वं पूर्वोक्तं विस्मृत्वा जनान् वञ्चित्वा स्वकीयं स्वार्थं पूर्णं कुर्वन्ति।

**6. नैतिकमूल्यनां पतनस्य समस्याः** प्राचीनकालेऽस्माकं समाजे ''मातृवत्परदारेषु, परद्रव्येषु लोष्ठवत्'' इवञ्च ''उदारचरितनाञ्तु वसुधैव कुटुम्बकम्'' इत्यादयः भावनासीत्। परन्तु वर्तमानकाले जनाः स्वार्थयुत्ताः दृश्यन्ते। प्राचीनसमये जनेषु दया, प्रेमः, परोपकारः, सदाचारादयः संस्कारासन् परन्तु वर्तमानकाले तु सर्वत्र नैतिकमूल्यानां पत्तनं दृश्यन्ते। अत्र ''कर्मयोगी'' लघुकथायां समस्यायाः चित्रणं प्राप्यते यथा– ''अपि! छादि्मकाः खलु एते भवन्ति। अवसरं प्राप्य यात्रिणां सर्वमपि वस्तुजातं गृहीत्वा पलायन्ति।''... तस्य कर्णमापतितानि ईदृशानि वचनानि किन्तु न हितस्य साधनायां मनागपि अवरोधो जातः। [5]

**7. दाम्पत्यजीवने विघटनस्य समस्याः** वर्तमाने समस्यारियं महती प्रचण्डा दरीदृश्यते। जनेषु विनम्रतायाः सहनशीलतायाः आभावः प्रतीयते। समाजे दाम्पत्य विघटनस्य समस्यायाः सख्यामोत्तरत्तरं वृद्धि जायन्ते। सर्वेषां कृते चिन्तनस्योऽयं विषयो।

**8. निष्कर्षः** ''कथाञ्जलिः'' इति लघुकथाग्रन्थे वर्णिताः वर्त्तमानकालस्य समस्यायाः ऊपरि अत्र शोधपत्रे मया संक्षिप्तरुपेण मया चर्याविहिता। यदि समस्यानामुपरिः विचारो समीक्षा वा क्रियते तदाऽस्माकं सर्वेषां कृते राष्ट्रस्य कृते, समाजस्य कृते लाभकारी भविष्यति। तथा वयं सर्वे मिलित्वा समस्यानां विनाशे सफलाः भविष्यन्ति।

**संदर्भ**


1. कथाञ्जलिः– डॉ. अर्चना जोशी, पृष्ठ 8
2. कथाञ्जलिः– डॉ. अर्चना जोशी, पृष्ठ 39
3. कथाञ्जलिः– डॉ. अर्चना जोशी, पृष्ठ 33
4. कथाञ्जलिः– डॉ. अर्चना जोशी, पृष्ठ 49
5. कथाञ्जलिः– डॉ. अर्चना जोशी, पृष्ठ 13